चतुर्थः पाठः

# पितृसेवा परं ज्ञानम्

संस्कृतसाहित्ये द्विविधम् आख्यानसाहित्यम् उपलभ्यते। प्रथमम् उपदेशात्मकं नीतिकथात्मकं च साहित्यं पञ्चतन्त्रेषु पशुपक्षिकथामाध्यमेन रोचकरूपेण कथितम्। अपरं लोककथात्मकं मनोरञ्जनात्मकम् आख्यानसाहित्यम्। उपदेशात्मकाख्यानग्रन्थेषु शुकसप्ततिः प्रसिद्धः ग्रन्थः। नीतिकथासु उपदेशस्य प्रवृत्तिः तथा लोककथासु मनोरञ्जनस्य वृत्तिः प्रमुखतया भवति। शुकसप्ततिः उपदेशात्मककथानाम् उत्तमः सङ्ग्रहः। अस्य लेखकविषये रचनाकालविषये च निश्चयः नास्ति, किन्तु इदानीं शुक नाम्नः उपलभ्यते। 1400 ई. मध्ये एतस्य कथाग्रन्थस्य कालः अनुमीयते। अतः तत एव एका मातृपितृभक्तिपरककथा शिक्षणाय अत्र प्रस्तुता।

चन्द्रपुरनाम्नि नगरे श्रेष्ठिनः हरिदत्तस्य पुत्रः मदनविनोदस्तु अतीवविषयासक्तः कुपुत्रः पितुः शिक्षां न शृणोति स्म। तस्य द्यूतमृगयावेश्यामद्यादिषु अतीव आसक्तिः। कुमार्गचारिणं तं कुपुत्रं दृष्ट्वा तत्पिता हरिदत्तः सपत्नीकः अतीव दुःखितः सञ्जातः। तं हरिदत्तं कुपुत्रदुःखेन पीडितं दृष्ट्वा तस्य सखा त्रिविक्रमनामा द्विजः स्वगृहतो नीतिनिपुणं शुकं सारिकां च गृहीत्वा तद्गृहं गत्वा प्राह- 'सखे हरिदत्त! एनं शुकं पुत्रवत्त्वं सपत्नीकं परिपालय। एतत्संरक्षणेन तव दुःखं दूरीभविष्यति।'

हरिदत्तस्तु शुकं गृहीत्वा पुत्राय समर्पयामास। मदनविनोदेन शयनमन्दिरे स्वर्णपञ्जरस्थः स्थापितः परिपोषितश्च।

अथैकदा रहसि शुको मदनं प्राह-हे सखे!

**पित्रोस्ते दुःखिनोर्दुःखात्पतत्यश्रुचयो भुवि।**
**तेन पापेन ते वत्स पतनं देवशर्मवत्॥1॥**

स प्राह- 'कथमेतत् ?'

शुक आह-अस्ति पञ्चपुरं नाम नगरम्। तत्र सत्यशर्मा ब्राह्मणः। तद्भार्या धर्मशीलानाम्नी। पुत्रस्तु देवशर्मा। स च अधीतविद्यः पितृप्रच्छन्नवृत्या देशान्तरं गत्वा भागीरथीतीरे तपः कृतवान्।

एकदा स तपस्वी गङ्गातीरे जपार्थमुपविष्टः। तस्मिन्काले कयाचित् बलाकया उड्डीयमानया तदङ्गोपरि पुरीषोत्सर्गः कृतः। स च तपस्वी क्रोधाकुलितनेत्रः यावदूर्ध्वं पश्यति तावत्तत्क्रोधाग्निना भस्मीभूतां बलाकां भूमौ पतितां दृष्ट्वा (बलाकां दग्ध्वा) नारायणद्विजगृहे भिक्षार्थं ययौ। स्वभर्तृशुश्रूषापरया तत्पत्न्या कोपाभिविष्टो निर्भर्त्सितः सत्पक्षिहायमुक्तश्च-

'नाहं बलाकेव त्वत्कोपस्थानम्।'

स च प्रच्छन्नपातकज्ञानाद्भीतो विस्मितश्च, प्रेषितश्च तया धर्मव्याधपार्श्वे वाराणसीं नगरीं ययौ। तत्र रक्ताक्तहस्तं यमप्रतिमं मांसविक्रयं विदधानं तं दृष्ट्वा दृशामन्तः स्थितः। व्याधेन स्वागतप्रश्नपूर्वकं स्वगृहं नीत्वा निजपितरौ सभक्तिकं भोजयित्वा पश्चात्तस्य भोजनं दत्तम्। तदनन्तरं स च व्याधं ज्ञानकारणं पप्रच्छ- 'कथं सती ज्ञानवती, कथं च त्वं ज्ञानवान्।'

तेन व्याधेनोक्तम्-

**निजान्वयप्रणीतं यः सम्यग्धर्मं निषेवते।**
**उत्तमाधममध्येषु विकारेषु पराङ्मुखः॥2॥**

**स गृही स मुनिः साधुः स योगी स च धार्मिकः।**
**पितृशुश्रूषको नित्यं जन्तुः साधारणश्च यः ॥3॥**

अहं सापि च एवं ज्ञानिनौ त्वं च निजपितरौ परित्यज्य भ्रमन्मादृशां न सम्भाषणार्हः। परमतिथिं मत्वा जल्पितः।

एवमुक्तः स ब्राह्मणो विनयपरं व्याधं पप्रच्छ। तेनोक्तम् –

**न पूजयन्ति ये पूज्यान्न मान्यान् मानयन्ति ये।**
**जीवन्ति निन्द्यमानास्ते मृताः स्वर्गं न यान्ति च ॥4॥**

**व्याधेन बोधितस्तेन स ययौ गृहमात्मनः।**
**अभवत्कीर्तिमाँल्लोके परतः कीर्तिभाजनम्॥ 5॥**

तस्माद्वणिग्धर्मं स्वकुलोद्भवं स्मर पित्रोश्च विनयपरो भव।

एवमुक्तः स मदनः विनयपरः सदाचारी च अभवत् पितरौ नमस्कृत्य तदनुज्ञातो भार्याञ्चापृच्छ्य प्रवहणमधिरूढवान् गतो देशान्तरम्।

## शब्दार्थः

| | | |
|---|---|---|
| श्रेष्ठिनः | – | सेठ (का) षष्ठी विभक्ति |
| अधीतविद्यः | – | पढ़ा लिखा |
| पितृप्रच्छन्नवृत्या | – | पिता को न बताकर |
| बलाकया | – | बगुली के द्वारा |
| पुरीषोत्सर्गः | – | मल का त्याग |
| क्रोधाकुलितनेत्रः | – | क्रोध पूर्ण नेत्र |
| सत्पक्षिहा | – | निरीह पक्षी को मारने वाला |
| रक्ताक्तहस्तम् | – | खून से रङ्गे हाथ वाले को |
| यमप्रतिमम् | – | यमराज के समान भयङ्कर |
| दृशामन्तः स्थितः | – | कुछ दूर सामने खड़ा हुआ |
| निजान्वयप्रणीतम् | – | कुल के द्वारा किया गया |
| विकारेषु | – | दोषों में |
| पराङ्मुखः | – | विमुख |
| गृही | – | गृहस्थ |
| पितृशुश्रूषकः | – | पिता की सेवा करने वाला |
| सम्भाषणार्हः | – | सम्भाषण के योग्य |
| जल्पितः | – | कहा गया |
| प्रवहणम् | – | गाड़ी / जलयान |

## अभ्यासः

### ( 1 ) एकपदेन उत्तरं लिखत –

(क) हरिदत्तस्य पुत्रः कः?

(ख) मदनविनोदेन स्वर्णपञ्जरस्थः शुकः कुत्र स्थापितः ?

(ग) त्रिविक्रमनामा द्विजः कस्य सखा आसीत्?

(घ) देवशर्मा कुत्र तपः अकरोत् ?

(ङ) देवशर्मोपरि कया पुरीषोत्सर्गः कृतः ?

### ( 2 ) एकवाक्येन उत्तरं लिखत –

(क) मदनविनोदः कस्य शिक्षां न शृणोति स्म?

(ख) मदनविनोदस्य आसक्तिः केषु आसीत् ?

(ग) द्विजपत्नी देवशर्माणं किम् उक्तवती ?

(घ) देवशर्मा विस्मितः कथं सञ्जातः ?

### ( 3 ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत –

(क) शुको देवशर्मणः पतनाय किं कारणमवोचत् ?

(ख) बलाका कथं भस्मीभूता जाता ?

(ग) के जनाः निन्द्यमानाः जीवन्ति ?

(घ) व्याधः स्वज्ञानस्य कारणम् किम् उक्तवान् ?

(ङ) अस्य पाठस्य आशयः कः ?

### ( 4 ) अधोलिखितवाक्येषु पदपूर्तिं कुरुत –

(क) हरिदत्तः कुपुत्रं दृष्ट्वा . . . . . . . . . . . . . . सञ्जातः।

(ख) शुकं सपत्नीकं . . . . . . . . . . . . . . परिपालय।

(ग) तपस्वी . . . . . . . . . . . . . . जपार्थमुपविष्टः।

(घ) ब्राह्मणः . . . . . . . . . . . . . . व्याधं पप्रच्छ।

(ङ) नाहं . . . . . . . . . . . . . . त्वत्कोपस्थानम्।

(च) क्रोधाग्निना . . . . . . . . . . . . . . बलाकां भूमौ पातितवान्।

## ( 5 ) युग्ममेलनं कुरुत –

| ( अ ) | ( आ ) |
|---|---|
| (क) अतीवविषयासक्तः कुपुत्रः | जपार्थमुपविष्टः। |
| (ख) मदनविनोदेन शयनमन्दिरे | सम्यग्धर्मं निषेवते। |
| (ग) तपस्वी गङ्गातीरे | स्वर्णपञ्जरस्थः स्थापितः। |
| (घ) निजान्वय प्रणीतं यः | परतः कीर्ति भाजनम्। |
| (ङ) अभवत् कीर्तिमान् लोके | पितुः शिक्षां न शृणोति। |

## ( 6 ) अधोलिखितशब्दानां सन्धिविच्छेदं कुरुत –

(क) अथैकदा

(ख) पित्रोस्ते

(ग) तदङ्गोपरि

(घ) बलाकेव

(ङ) विषयासक्तः

## ( 7 ) अधोलिखितपदानां समासविग्रहं कुरुत –

(क) कुपुत्रः

(ख) स्वगृहतः

(ग) नीतिनिपुणम्

(घ) गङ्गातीरे

(ङ) पितरौ

(च) शयनमन्दिरे

## ( 8 ) अधोलिखिताव्ययानां वाक्येषु प्रयोगं कुरुत –

उपरि, च, तत्र, एवम्, न, ऊर्ध्वम्, इव, कथम्।

## ( 9 ) अधोलिखितवाक्यानि कः कं प्रति कथयति –

(क) एनं शुकं सपत्नीकं पुत्रवत्त्वं परिपालय।

(ख) अस्ति पञ्चपुरं नाम नगरम्।

(ग) नाहं बलाकेव त्वत्कोपस्थानम्।

(घ) कथं सती ज्ञानवती, कथं च त्वं ज्ञानवान्।

(ङ) ये मान्यान् न मानयन्ति ते मृताः स्वर्गं न यान्ति।

### ( 10 ) अधोलिखितशब्दानां प्रकृति-प्रत्ययं च पृथक् कुरुत -

(क) गृहीत्वा

(ख) दत्तम्

(ग) ज्ञानवान्

(घ) परित्यज्य

(ङ) निन्द्यमानाः

### ( 11 ) अधोलिखितशब्दानां मूलशब्दं विभक्तिं वचनञ्च लिखत -

(क) रहसि

(ख) दुःखिनः

(ग) भुवि

(घ) एनम्

#### योग्यताविस्तारः-

- संस्कृतसाहित्ये पितृभक्तिपरायणानां महानुभावानां विषये ज्ञानं प्राप्य तेषां नामानि सूचीबद्धम् करोतु।
- अस्य पाठस्य सारांशं लिखत।

❖ ❖ ❖